वसुना स्वर्गकामेन रुद्रेण च महात्मना।
मया च विष्णुना शक्र वरुणेन च महोमया॥
आत्मानञ्च स्वरूपेण धारायान्तु प्रपादितम्।
देवी सान्निध्यमायाता सर्व्वकामप्रदायिका॥
तस्मात्त्वमपि राजेन्द्र! वसोर्धारां प्रपातय।
नान्यः परतरं पुण्यं विद्यते नृपसत्तम!॥
वसोर्धाराप्रदानस्य एकाहमपि यद्भवेत्।
नृपेणायुषकामेन पुत्त्र राज्यजिगीषुणा।
देया धारा सदा वत्स! रिपुनाशाय बुद्धिमन्॥
द्रव्याभावे घृताभावे नृप तस्करजे भये।
यदि नो वहते धारा तदा छिद्रं न विद्यते॥
महाआश्विनमासे तु अष्टमीनवमीषु च।
कार्त्तिक्यां माघचैत्रे तु चित्रायां रोहिणीषु च॥
वैशाख्यान्तु प्रदातव्या ज्यैष्ठ्यां ज्येष्ठस्य सत्तम!।
आषाढ़ादशमीहोमं अष्टमी पूर्णिमा नभे॥
नभस्ये रोहिणी वत्स! चतुर्थ्यां द्वादशीदिने।
संक्रान्तिषु च सर्व्वासु गुरुशौरिभवासु च॥
चन्द्रसूर्य्योपरागेषु प्रतिष्ठायज्ञकर्म्मणि।
शक्रोच्छ्रये प्रदातव्या चक्रपुष्याभिषेचने॥
मार्गे व्रतनिवन्धे तु शुभे वाक्ये तु दर्शने।
ग्रहनक्षत्रोपसर्गेषु धारा देयाः शुभावहाः॥
एवं यो वाहयेद्धाराः शास्त्रदृष्टेन कर्म्मणा।
तस्य भूः सिद्ध्यते सर्व्वा सनागा सहसागरा॥"
इति देवीपुराणे वसोर्धारानाम ३५ अध्यायः॥

वसुन्धरा, स्त्री, (वसूनि धारयतीति। धृ + "संज्ञायां भृतॄवृजिधारिसहितपिदमः।" ३। २। ४६। इति खच्। "खचि ह्रस्वः।" ६। ४। ६४। इति ह्रस्वः। "अरुर्द्विषदजन्तस्य मुम्।" ६। ३। ६७। इति मुम्।) पृथिवी। इत्यमरः। (यथा, विष्णुपुराणे। १। ४। ११।
"निरीक्ष्य तं तदा देवी पातालतलमागतम्।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा॥"
श्वफल्कस्य कन्या। यथा, हरिवंशे। ३८। ५३।
"विश्रुता शाम्बमहिषी कन्या चास्य वसुन्धरा।
रूपयौवनसम्पन्ना सर्व्वसत्त्वमनोहरा॥"
पुं, शाकद्वीपस्य वर्णपुरुषभेदः। यथा, भागवते। ५। २०। ११। "ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो ... (यथा, भागवते) ... ऋतवर्णपुरुषाः श्रुतिधरवीर्य्यधरवसुन्धरेषुन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते॥")

वसुप्राणः, पुं, (वसु दीप्तिः प्राणा इवास्य।) अग्निः। इति शब्दरत्नावली॥

वसुमती, स्त्री, (वसूनि धनरत्नानि सन्त्यस्या इति। वसु + मतुप्। ङीप्।) पृथिवी। इत्यमरः॥ (यथा, रघौ। ८। ८३।
"तदलं तदपायचिन्तया
विपदुत्पत्तिमतामुपस्थिता।
वसुधेयमवेक्ष्य तां त्वया
वसुमत्या हि नृपाः कलत्रिणः॥")

वसुरोचिः, [स्] क्ली, (वसवः रोचन्ते अस्मिन्निति। रुच दीप्तौ + "वसौ रुचेः संज्ञायाम्।" उणा० २। ११२। इति इसिन्।) यज्ञः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

वसुलः, पुं, (वसुं दीप्तिं लाति गृह्णातीति। ला + कः।) देवता। इति त्रिकाण्डशेषः॥

वसुश्रेष्ठं, क्ली, (वसुना दीप्त्या श्रेष्ठम्।) रूप्यम्। इति राजनिर्घण्टः॥

वसुषेणः, पुं, कर्णराजः। इति त्रिकाण्डशेषः। (यथा, महाभारते। १। ६७। १४०।
"राधायाः कल्पयामास पुत्त्रं सोऽधिरथस्तदा।
चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ।
दम्पती वसुषेणेति दिक्षु सर्व्वासु विश्रुतम्॥"
क्वचित् वसुधेणेति पाठः॥)

वसुस्थली, स्त्री, (वसूनां धनानां स्थली।) कुवेरपुरी। इति शब्दमाला॥

वसुहट्टः, पुं, (वसूनां दीप्तीनां हट्ट इव।) वकवृक्षः। इति रत्नमाला॥

वसुहट्टकः, पुं, (वसुहट्ट + स्वार्थे कन्।) वकवृक्षः। इति शब्दमाला॥

वसूकं, क्ली, साम्भरिलवणम्। इति हेमचन्द्रः॥ वकपुष्पम्। इति द्विरूपकोषः॥

वस्क, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) दन्त्यमध्य इति दुर्गसिंहः॥ क्विपि वक्। मूर्द्धन्यमध्य इत्यन्ये। क्विपि वट्। ङ, वस्कते। इति दुर्गादासः॥

वस्कः, पुं, (वस्क् + भावे घञ्।) अध्यवसायः। इति भूरिप्रयोगः॥

वस्कयः, पुं, (वस्कते इति। वस्क गतौ + बाहुलकात् अयन्।) एकहायनो वत्सः। इत्यमरटीकायां रायमुकुटः॥

वस्कयणी, स्त्री, (वस्कय एकहायनो वत्सः। तेन नीयते इति। नी + क्विप्। ङीष्।) चिरप्रसूता गौः। इत्यमरटीकायां रायमुकुटः॥ अस्या दुग्धगुणाः।
"वस्कयिन्यास्त्रिदोषघ्नं तर्पणं बलकृत् पयः।"
इति भावप्रकाशः॥

वस्कराटिका, स्त्री, वृश्चिकः। इति हारावली॥

वस्त, क ङ वधे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, वस्तयते। गतिहिंसायाचनेष्विति रमानाथः। इति दुर्गादासः॥

व(ब)स्तः, पुं, (वस्यते यज्ञार्थं वध्यते इति। वस्त + कर्म्मणि घञ्।) छागः। इत्यमरः। २। ९। ७६॥ (यथा, मार्कण्डेये। ४३। १२।
"यस्य वस्तसमो गन्धो गात्रे शवसमोऽपि वा।
तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप! जीवितम्॥")

वस्तकं, क्ली, कृत्रिमलवणम्। इति हेमचन्द्रः॥

वस्तकर्णः, पुं, (वस्तस्य छागस्य कर्णाकृतिः पत्रावच्छेदे अस्त्यस्येति। वस्तकर्ण + अर्श-आदित्वादच्।) शालवृक्षः। इति राजनिर्घण्टः॥

वस्तगन्धा, स्त्री, (वस्तस्य गन्ध इव गन्धो यस्याः।) इति राजनिर्घण्टः॥

वस्तमोदा, स्त्री, (वस्तं छागं मोदयतीति। मुद + णिच् + अण्।) अजमोदा। इति राजनिर्घण्टः॥

वस्तयः, पुं स्त्री भूम्नि, (वस् + "वसेस्तिः।" उणा० ४। १७९। इति तिः बहुवचनान्तोऽयम्।) वस्त्रस्य दशाः। यथा, अमरः। २। ६। ११४।
"स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्व्वस्तयो
द्वयोः॥"

वस्ताम्ली, स्त्री, (वस्तस्येव अम्लमस्याः। गौरादित्वात् ङीष्।) छगलाम्लीक्षुपः। तत्पर्य्यायः। वृषगन्धाख्या २ मेषाम्ली ३ वृषपत्रिका ४ अजाम्ली ५ बोकड़ी ६। अस्या गुणाः। कटुरसत्वम्। कासदोषविनाशित्वम्। वीजदाढ्यत्वम्। गर्भजनकत्वञ्च। इति राजनिर्घण्टः॥

वस्तिः, पुं, स्त्री, (वसति मूत्रादिकमत्र। वस् + "वसेस्तिः।" उणा० ४। १७९। इति तिः।) नाभेरधोभागः। इत्यमरः॥ वस्ते आच्छादयति मूत्राशयपुटं वस्तिः। वस ल स्नुतौ नाम्नीति तिक्। मूत्राशयपुटो वस्तिरिति रत्नमाला। इति तट्टीकायां भरतः॥ * ॥ अथ वस्तिविधिः।
"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः॥
कषायक्षारतैलैर्यो निरूहः स निगद्यते।
वस्तिभिर्दीयते यस्मात् तस्माद्वस्तिरिति स्मृतः॥"
वस्तिभिः मृगादीनां मूत्राशयैः।
"तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते।
अनुवासनभेदश्च मात्रावस्तिरुदीरितः॥
पलद्वयं तस्य मात्रा तस्मादर्द्धोऽपि वा भवेत्।
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली॥
नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी।
नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः॥
शोथमूर्च्छारुचिभयश्वासकासक्षयातुराः।
नेत्रं कार्य्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः।
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते॥"
नेत्रं नाड़ी। तथा च विश्वप्रकाशे।
नेत्रं पथि गुणे वस्त्रे तरुमूले विलोचने।
नेत्रवस्ते च नाथाच नेत्रो नेतरि भेदवदिति॥
"एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलम्।
ततो द्वादशकं यावन्मानं स्याद्दशसंमितम्॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता।
मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिरन्ध्रकम्॥
यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम्॥"
मूले स्थूलम्। ततः क्रमात् सूक्ष्मम्। मुद्गच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षाय द्वादशवर्षाय तदूर्द्ध्ववर्षाय ज्ञेयम्।
"आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते।
कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम्॥"
परिणाहोऽत्र स्थौल्यम्।
"तन्मूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्थकात्।
कर्णिका गवादिकर्णवत्। कर्णिका छत्राकारा गुदाधिकान्तःप्रवेशरोधिनी कर्णिकेति। कर्णिकाकारत्वात् कर्णिकेति कथ्यते।